International Journal of Sanskrit Research 2018; 4(1): 116-117

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(1): 116-117
© 2018 IJSR
www.anantaajournal.com
Received: 25-11-2017
Accepted: 28-12-2017

**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

**Corresponding Auhtor:**
**डॉ० सिद्धि कुमार झाः**
विष्णबरुआरः, खजौली, मधुबनी, बिहार, भारत

# अग्निपुराणे वर्णितानि व्याकरणतत्त्वानि

**डॉ० सिद्धि कुमार झाः**

**सारांश**
महर्षिवेदव्यासकृतम् अग्निपुराणं संस्कृतवाड्.मयस्य विश्वकोषोऽस्ति। अत्र व्याकरणं, कोषः, छन्दः, साहित्यं धर्मशास्त्रं, सकलदर्शनानि, ज्योतिषं निरुक्तं, शिक्षा, कल्पः वेदाः, कला, शिल्पं चिकित्साशास्त्रं, संड्.गीतं, भूगोलविद्या, इतिहासः, पुराकथा, नीतिः, दण्डनीतिः, धनुर्वेदः, पशुचिकित्सा विमानशास्त्रं, रसायनशास्त्रमित्यादीनि शास्त्राणि लोकाचारादिव्यवहाराश्च सन्ति। तत्र व्याकरणविषयकाः विचाराः 348 तमाध्यायात् 358 तमाध्यायपर्यन्तं विद्यन्ते।

**प्रस्तावना**
तत्र कात्यायनं प्रति स्कन्दस्योपदेशरुपेण व्याकरणविषयाः परमसरलतया निरुपिताः सन्ति। अत्रत्यं वैशिष्ट्यं वर्तते यत् प्रतिप्रकरणं सिद्धरुपाणाम् उपन्यासेन संस्कृतभाषा हृदयंगमा कार्यते।_ तथाहि–

**वक्ष्ये व्याकरणं सारं सिद्धशब्दस्वरूपकम्। [1]**
**कात्यायनविबोधाय बालानां बोधनाय च।।**

वस्तुतः सूत्रादिनियमजालैः प्रकृति–प्रत्यय विभागोः आगमादेशलोपादिप्रक्रियाभिः काठिन्यं मन्यमानाः प्रयोगदर्शनेनैव ज्ञातुं यतन्ते। सिद्धस्वरूपद्वारा भाषाशिक्षणं सर्वप्राचीनं मन्यते। आदौ सृष्ट्यारम्भे प्रतिपदपाठं [2] एव व्याकरणस्य कृत्यमासीत्। तदनु ऐन्द्रव्याकरणे [3] सा शैली परिवर्तिता। परन्तु भट्टकाव्यादिषु [4] शब्दस्वरूपज्ञापनद्वारैव भाषाज्ञानं कार्यते। प्रयोगसंग्रहेऽपि मूलतः सिद्धरूपाणामेव निदर्शनं क्रियते। परन्तु कथमेवं जातमिति न कथितम्। एवमेव अग्निपुराणेऽपि सन्धि–कृत–तद्धितादिसिद्धाः प्रयोगाः निर्दिश्यन्ते। तत्र अध्यायक्रमेण विषयनिर्देशः प्रस्तूयते–

| व्याकरणे अध्यायक्रमः | अध्यायः | विषयः |
|---|---|---|
| 1 | 348 | व्याकरणे प्रत्याहारः |
| 2 | 349 | सन्धिसिद्धरूपाणि |
| 3 | 350 | सुबन्ताः शदाः |
| 4 | 351 | स्त्रीप्रत्ययान्ताः शब्दाः |
| 5 | 352 | नपुंसकलिंगाः शब्दाः |
| 6. | 353 | कारकोदाहरणानि |
| 7 | 354 | समासोदाहरणानि |
| 8 | 355 | तद्धितान्ताः शब्दाः |
| 9 | 356 | उणादिनिष्पन्नाः शब्दाः |
| 10 | 357 | तिड.न्ताः शब्दाः |
| 11 | 358 | कृदन्ताः शब्दाः |

अग्निपुराणे वर्णपाठः प्रत्याहाररचनारीतिश्च प्रथमं निरूपितमस्ति। प्रत्याहाराधारेण सन्धिप्रकरणबोधने सुलभता भवति। अत्र पाणिनेः प्रत्याहारविधायकं सूत्रम् ''आदिरन्त्येन सहेता'' [6] इति तथा इत्संज्ञासूत्रे ''उपदेशेऽजनुनासिक इत् [7] हलन्त्यम् [8] इति च आधारीकृत्य परमसरलरीत्या श्लोकमाध्यमेन प्रत्याहरो बोधितः [9]–

**''उपदेश इद् हलन्तं भवेदजनुनासिकः।**
**आदिवर्णो गृह्यमाणोऽप्यन्त्येनेता सहैव तु।।**
**तयो र्मध्यगतानां स्याद् ग्राहकः स्वस्य तद् यथा।।**

तदनुसारम् उपदेशे (प्रथमतः प्राप्ते) वर्णसूत्रे, धातौ, प्रत्यये वा तदन्तिमस्य हल्वर्णस्य इत्संज्ञा भवति। तत्रैव अनुनासिकस्य अचः (अन्त्यस्यानन्त्यस्य च) इत्संज्ञा भवति। इत्संज्ञकवर्णस्य लोपो भवति [10] प्रयोगे। प्रत्याहारे इत्संज्ञकसदृशस्य ग्रहणान्न लोपो भवति। उपदेशश्च आद्योच्चारणमिति भट्टोजिदीक्षितः। [11] अज्ञातस्वस्वरुपज्ञापकत्वं हि आद्योच्चारणमित्यस्यार्थ इति नागेशभट्टः। [12] तदनुसारं शब्दानां प्रथमतः प्राप्तिरेवोपदेश इत्याशयः। तत्र इत्संज्ञानन्तरं पठितवर्णसूत्रतः कमपि अनित्संज्ञकं वर्णमादाय तदन्ते कमपि तत्रत्यम् इत्संज्ञकवर्णं योजयित्वानयोर्योगेनैकः प्रत्याहारो भवति। तेन च स्वमध्यवर्तिनां वर्णानां स्वस्य च बोधः कार्यते। अन्त्यस्य तु प्रत्याहारे ग्रहणं न भवति। तथा च ''अइउण् ऋलृक् एओङ्.ऐऔच्'' इत्यत्र अच्, अण्, अक्, इच्, उक्, एङ्., एच्, ऐच् इत्येते प्रत्याहाराः भवन्ति। तत्र उक् इत्यत्र आदौ अइउण् सूत्रस्थः उकारो गृहीतः, अन्ते च इत्संज्ञको वर्णः ककारो गृहीतः। तेन तन्मध्यवर्तिना 'इ ऋ लृ' इत्येतेषाम् उकारस्य च बोध 'उक्' प्रत्याहारेण भवति।_ प्रत्याहारशब्दस्य व्युत्पत्तिलभ्यश्चार्थः एवम् – ''प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा यस्मिन् इति प्रत्याहारः, [13] इति। ततश्च वर्णसंक्षेपीकरणं प्रत्याहारस्य कृत्यमस्ति।

अग्निपुराणे सिद्धस्वरुपाणां प्रयोगाणां प्रदर्शनमस्ति। उदाहरणस्वरुपेण सम्प्रदाननिरुपणं प्रस्तूयते–

**''सम्प्रदानं त्रिधा प्रोक्तं प्रेरकं ब्रह्मणाय गाम्। [14]**
**नरो ददाति नृपतये दासं तदनुमन्त्रिकम्।।**
**अनिराकर्तृकं भर्त्रे दद्यात् पुष्पाणि सज्जनः।।**

तदनुसारं सम्प्रदानम् त्रिधामतम्, केन प्रकारेण त्रिविधं–सम्प्रदानम्? प्रेरकम्, आनुमंत्रिकम्, अनिराकर्तृकं चेति। तत्र–

1) प्रेरकं यस्मै दीयते स यदि पूर्वं दानाय प्रेरयति तादृशसम्प्रदानं प्रेरकं कथ्यते। यथा–कश्चिद् ब्रह्मणः कथयति मह्यं गां देहि। पुनश्च दाता ददाति। यथा–ब्रह्मणाय गां ददाति गृहस्थः।

2) आनुमन्त्रिकं – पूर्वम् अनुमति प्राप्य यदि दीयते तद् आमन्त्रिकं सम्प्रदानं भवति। यथा– अतिथये फलमूलं ददाति।

3) अनिराकर्तृकं – यस्मै दीयते स न च प्रेरयति न अनुमतिं ददाति, न च निराकरणं करोति तत्सम्प्रदानम् अनिराकर्तृकं सम्प्रदानं कथ्यते। यथा– सूर्याय अर्ध्यं ददाति। ''कर्मणा यमभिप्रैति स सम्प्रदानम् [15]'' इति सम्प्रदानसंज्ञा। ''चतुर्थी सम्प्रदाने'' [16] इति चतुर्थी विभक्ति र्भवति''। कृत्सिद्धरूपप्रतिपादने आग्नेयपुराणे प्रत्ययाः तत्सिद्धरूपाश्च सम्यग् निरूपिताः यथा [17]–

**'अचि धर्मस्य विनय उत्करः प्रकरस्तथा।**
**देवे भद्रः श्रीकरश्च, ल्युटि रूपं तु शोभनम्।।**
**क्तिनि बुद्धिः स्तुतिमती, धञि भावोऽथ युच्यपि।**
**कारणा भावेनेत्यादि, अकारे च चिकित्सया।।**
**तथा तव्यो ह्यनीयश्च कर्त्तव्यम् करणीयम्।**
**देयं ध्येयं चैव यति, ण्यति कार्यञ्च कृत्यकाः''।।**

**निष्कर्ष**

तथा च अय् प्रत्यान्ताः वि [18] + नी + अच् = विनयः,
उत्[19] + कृ + अच् = उत्करः, प्र + कृ + अच् = प्रकरः, श्री [20] + कृ + अच = श्रीकरः इत्यादयः प्रयोगाः पुल्लिंगा भवन्ति। ल्युट् प्रत्ययान्ताः शुभ् + ल्युट्= शोभनम्, पठनम्, गमनम्, बोधनम् इत्याद्याः शब्दाः नपुंसकलिंगाः भवन्ति, क्तिन्प्रत्ययान्ताः वृध् + क्तिन् (ति) = वृद्धिः, स्तु + क्तिन् = स्तुतिः, मतिः, नतिः रतिः सन्ततिः इत्याद्याः स्त्रीलिंगाः भवन्ति। घञ्प्रत्यान्ताः भू + घञ् (अ) = भावः रागः, पाठः हासः इत्यादयः पुल्लिंगाः भवन्ति। युच्प्रत्यान्ताः कृ + युच् (अन)=कारण + टाप्= कारणा, भू + युच्= भावना, वासना उत्तेजना इत्यादयः प्रयोगाः स्त्रीलिंगाः भवन्ति। अप्रत्ययान्ताः चिकित्स [21] (कित् + कित् + सन्) + अ = चिकित्सा, जिघृक्षा [22] (ग्रह्), बुभुक्षा [23] (भुक्ष्), तितिक्षा [24] (त्यज्) इत्यादयः शब्दाः स्त्रीलिंगाः भवन्ति। तव्यप्रत्यान्ता कृ + तव्य = कर्तव्यम्, गन्तव्यम्, हसितव्यम् इत्यादयः शब्दाः त्रिलिंगाः [25] भवन्ति। अनीयप्रत्यान्ताः कृ + अनीय = करणीयम, पठनीयम्, हरणीयम् इत्याद्याः प्रयोगाः त्रिलिंगा [26] भवन्ति। यत्प्रत्यान्ताः दा+यत्= देयं, ध्येयं चेयम् इत्यादयः शब्दाः त्रिलिंगाः भवन्ति। ण्यत्(य) प्रत्यान्ता कृ + ण्यत् = कार्यं हार्यं,पाठ्यं वाच्यमित्यादयः त्रिलिंगाः भवन्ति। तव्य, अत्रीय, चत्, ण्यत्, क्यप् (इत्यः, स्तुव्यः) एते कृत्प्रत्ययाः कृत्यसंज्ञकाः भवन्ति। अनेन स्पष्टं भवति यद् अग्निपुराणं सिद्धरूपाश्रितं प्राचीनयुगोन्मुखमस्तीति।

**संदर्भाः–**


1. अग्निपुराणम् अ0 348, श्लो0 1
2. ''बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम। तस्मादनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः।' महाभाष्यम् पस्पशाह्निकम्।
3. तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्– तैत्तिरीयारण्यकम्।
4. महाकविभट्टिकृतं रावणवधमहाकाव्यम्।
5. उ उत्तिष्ठ, कवी एतौ वायू एतौ वने इमे।
   अमी एते यज्ञभूते एहि देव! इमन्नय।। अग्नि पु0– 349–5
6. अष्टाध्यायी– अ0 1.1.71
7. अष्टाध्यायी– अ0 1.3.2
8. अष्टाध्यायी– अ0 1.3.3
9. अग्निपु0 348– 2, 3
10. तस्यलोप! इति पाणिनिः
11. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमाटीका, संज्ञाप्रकारणम्– द्व0 आदिरन्त्येन सहेतासूत्र पार्श्वे
12. लधुशब्देन्दुशेखरः– संज्ञाप्रकरणे।
13. वैयाकरणसिद्धान्तकौमुदी– संज्ञाप्रकरणे।
14. अग्निपुराणम्– 353–9, 10
15. अष्टाध्यायी– अ0 1.4.32
16. अष्टाध्यायी– अ0 2.3.13
17. अग्निपुराणम्– 358–2, 3, 4
18. वि (उपसर्गः) + नी(धातुः)+अच् (अ) प्रत्ययः।
19. उत् (उपसर्गः) + कृ (धातुः) + अच् प्रत्ययः।
20. श्रियं करोतीति विग्रहे 'श्री' इतिपूर्वकात् कृधातोरच्प्रत्ययः। श्री (प्रातिपदिकम्) +कृ(धातुः)+ अच् प्रत्ययः।
21. कित् निवासे रोगापनयने च इति धातोः स्वार्थे 'गुप्तिज्किद्भ्यः सन्' इति सन् प्रत्ययः।
22. ग्रहीतुम् इच्छा (ग्रह् + सन्+अच्)
23. भोक्तुम् इच्छा
24. त्यक्तुम् इच्छा।
25. विशेष्याधीनमेव एते भवन्ति। यथा– पाठः पठितव्यः, पुस्तकी पठितव्या, काव्यं पठितव्यम्।
26. त्वया ग्रामो भमनीयः, गमनीया नगरी, नगरं गमनीयम्।